NAGPURSTUDY.COM

**KNT/KW/16/5038**

**Bachelor of Science (B.Sc.) Semester—I Examination**

**SANSKRIT**

**Compulsory Paper—2**

समय: — होरात्रयम्] [पूर्णांका: — 60

**सूचना** :— विशेष निर्देशाभावे उत्तराणि स्वीकृत भाषया लिखत।

1. कथां लिखत :

   सहाय: क्षेमकारक: **अथवा** शालिवाहन-कथा। 12

2. 'शिष्यानुशासनम्' स्वशब्दै: लिखत। 12

**अथवा**

वसुरक्षितेन दण्डनीते: महत्त्वं कथं स्पष्टीकृतम् ?

3. (अ) अनुवादं कुरुत :

राजा - (कर्णं दत्वा) अभूमिरियमविनयस्य। 6

को नु खल्वेष निषिध्यते ? (शब्दानुसारेण अवलोक्य। सविस्मयम्) अये को नु खलु अयमनुबध्यमान: तपस्विनीभ्याम्) मबालसत्वो बाल:।

बाल: - जृम्भस्व सिंह, दन्तांस्ते गणयिष्ये।

प्रथमा- अविनीत, किं नोऽपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि ? हन्त वर्धते तव संरम्भ:। स्थाने खलु ऋषिजनेन 'सर्वदमन' इति कृतनामधेयोऽसि।

राजा - किं नु खलु बालेऽस्मिन्नौरस इव पुत्रे स्निहयति मे मन: ? नूनमनपत्यता मां वत्सलयति।

द्वितीया- एषा खलु केसरिणी त्वां लङ्घयिष्यति यदि तस्या: पुत्रकं न मुञ्चसि।

बाल: - (सस्मितं) अहो बलीय: खलु भीतोऽस्मि।

**अथवा**

एकदा भोजराजो धारानगरे विचरन् क्वचिच्छिवालये प्रसुप्तं पुरुषद्वयमपश्यत्। तयोरेको विगतनिद्रो वक्ति। अहो, त्वं ममास्तरासन्न एवं कस्त्वं प्रसुप्तोऽसि जागर्षि नो वा। ततस्त्वपर आह। विप्र, प्रणतोऽस्मि। अहमपि ब्राह्मणपुत्रस्त्वामत्र प्रथमरात्रौ शयानं वीक्ष्य प्रदीप्ते च प्रदीपे कमण्डलूपवीतादिभि-ब्राह्मणं ज्ञात्वा भवदास्तरासन्न एवाहं प्रसुप्त:। इदानी त्वदि्गर माकर्ण्य प्रबुद्धोऽस्मि। प्रथम: प्राह-वत्स यदि त्वं प्रणतोऽसि ततो दीर्घायुर्भव। वद कुत आगम्यते, किं ते नाम, अत्र च किं कार्यम्। द्वितीय: प्राह-विप्र, भास्कर इति मे नाम। पश्चिमसमुद्रतीरे प्रभासतीर्थसमीपे वसतिर्मम।

(ब) निम्नलिखितं परिच्छेदं पठित्वा उत्तराणि **संस्कृत भाषया** लिखत : 6

आसीत् पुरा कोऽपि महातपा वनवासी मुनि:। कदाचित् तरुच्छायोपविष्टस्य तस्योपरि बलाका एका विष्ठाम् उत्ससर्ज। स च क्रुद्ध: तां ददर्श। दृष्टमात्रा एव सा बलाका भस्मसादभूत्। ततश्च स मुनि:



rtmnuonline.com

NagpurStudy.com

तपः प्रभावात् अहङ्कारम् आपद्यत्। एकदा असौ मुनिः क्वापि नगरे एकं ब्राह्मणगृहमेत्य तद्गृहिणीं भिक्षाम् अयाचत।

(i) महातपा मुनिः कुत्र वसति स्म ?

(ii) सः कुत्र उपविष्टः

(iii) तस्य उपरि बलाका किम् उत्ससर्ज ?

(iv) क्रुद्धः सः कां ददर्श ?

(v) मुनिः केन कारणेन अहङ्कारम् आपद्यत् ?

(vi) मुनिः कां भिक्षाम् अयाचत् ?

4. टिप्पणी **द्वयं** लिखत : 12

(i) वाल्मीकिः

(ii) भासः

(iii) कालिदासः

(iv) भारविः

5. (अ) **द्वयोः** ससन्दर्भं स्पष्टीकरणं लिखत : 6

(i) अहो निर्दयता दुरात्मनां पौराणाम्।

(ii) यौवनारम्भे एव च कन्यकानाम्
इन्धनी भवन्ति पितरः सन्तापानलस्य।

(iii) अथवा अनार्यः परदारव्यवहारः

(iv) अथवा तादृशं नररत्नं बहिरालोक्य रत्नाकरः उत्तरलितः।

(ब) अनुरूपं योजयत : 6

| (अ) | (ब) |
|---|---|
| इन्द्रिय कथा | भवभूतिः |
| श्रीपादशिलायां विवेकानन्दः | अश्वघोषः |
| महाभारतम् | छान्दोग्य उपनिषद् |
| बुद्धचरितम् | व्यासः |
| उत्तररामचरितम् | दशकुमारचरितम् |
| दण्डनीतिः | डॉ. श्री. भा. वर्णेकर |



rtmnuonline.com